Shri Raghunath Temple MSS. Library,
JAMMU

No. ४६७५

Title महारुद्रकर्म कलाप पद्धतिः

Author ×

Extent २६ पत्राणि Age सं. १७०१

Subject धर्मशास्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

महारुद्रसंक्षेपकर्मकलापपद्धतिः

४६७५

© Dharmartha Trust J&K. Digitized by eGangotri



...स्नी... ।।...विदा...

...विघ्न... गा। गणपति। स्वामि कुमार। पुष्पदंत।
कपर्दी। ...। महाकाल। भृंगरीट। स्कन्द। पद्मे। मूलप्रकृत्यै
अनंताय। कूर्म। अनन्त। पृथिवी। श्वेतद्वीप। कल्पवृ
क्ष। रत्नमंडप। रत्नसिंहासनाय। आत्मने। अंतरात्मने।
ज्ञानात्मने। परमात्मने। अग्निमंडलाय। सोममंडलाय। सू
र्यमंडलाय। सत्वाय। रजसे। तमसे। सर्वशक्ति कमलासनाय।
हृत्पराशरः। अपघातः सिद्धकामः सनत्कुमार [illegible]
शर्मा। ओमूत्रेया वक्रदोर दक्षिणाकाल योजनः दक्षिण
जनीयासो विप्र उत्सन्ने योजनः। जपहोमादी कर्मणो यथो
क्तफल [सम्यक् वेत्। धारे द्वं तदानीं नो। ज्ञा] त को यो ज्ञ
नेंद्रियः [योन वासात्वं धः शायाक कृष्णेकेन] दीयते इति ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथ महारुद्रः। इत्थं वक्ष्ये कर्मक्रमः। तत्रादौ प्रायश्चित्तं। मातृपूजनं। आभ्युदयिकं। गृहयज्ञश्च।
ततः नद्यादौ गमनं। स्नानविधिना स्नानं। तत्र दशसहस्रेण प्राणायामं। अनेन वरं पूतेन एकादश
वारं स्नानं। पुनः नमः शंभवाय चेति मंत्रान्ते निमज्य दशांशं रससहितैः संख्यातैः तिलैः शान्तिपंचकः।
ततः स्नानगर्तेषु एतां ते वाससी परिधाय त्रिपुण्ड्राणि धृत्वा नित्यं समाप्य सौ यज्ञस्थानं इति सूर्यार्घं दत्त्वा त-
तः गृहे आगत्य मंडपे आग्नेय्यां गणपतिपीठे अष्टदले गणपतिस्थापनं। प्रतिष्ठा। ध्या। प्रा। अपधारि
ततः प्रारब्धस्य महारुद्रस्य हवनकर्मान्तस्य निर्विघ्नेन समाप्त्यर्थं गणपतिपूजनमहं करिष्ये। आवा-
हनं। हे हेरंब त्वमेह्येहि ह्यंबिकात्र्यंबकात्मज। सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः पितः। नागा-
स्य नागहारत्वं गणराज चतुर्भुज। भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः। आवाहयामि पूजार्थं रक्षा-
र्थं च मम क्रतोः। इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे। इत्यावाह्य। सिंदूरादिभिः पूजा। तत्पुरुषा-
य नमः। वक्रतुंडाय दंतिने। रक्तपुष्पधूपदीपमोदकनिवेदनं। नालिकेरेणार्घः। तत्र मंत्रः। रक्ष रक्ष ग-
णाध्यक्ष त्रैलोक्यरक्षक। भक्तानामभयं कर्ता त्राता भव भवार्णवात्। द्वैमातुर कृपासिंधो
षाण्मातुराग्रज प्रभो। वरद त्वं वरं देहि वांछितं वांछितार्थद। गृहाणार्घमिमं देव सर्वदेव नमस्कृत॥
अनेन पूजाविधानेन फलदो स्तु सदा मम। इत्यर्घः। नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः। नमस्ते रुद्ररूपाय
करिरूपाय ते नमः। विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे। भक्तप्रियाय देवाय नमस्तुभ्यं विनाय-
क। लंबोदर नमस्तुभ्यं सततं मोदकप्रिय। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा। वक्रतुंड मह-
काय सूर्यकोटिसमप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा। इति यथाशक्ति गणपं प्रपूज्य १
तेन चोपयजमानः सपत्नीकं कुंडपश्चिमे प्रागच्छेत्।

© Dharmartha Trust J&K. Digitized by eGangotri

ूप वीतबंधनं। दधिदूर्वांकुरा गंधाः सिद्धार्थसंयुताः। जलपुष्पसमायुक्ताः पादार्घ्येणि
रष्टभिः। तत्र तान्प्रमुखानुपवेश्य स्वयमुदङ्मुखः प्रयोगं कुर्यात्। तद्यथा। सुमुखश्चै
कदंतश्चेत्यादि गणपतिस्मरणं। स्वस्ति श्रीमदिह कस्य चित्सच्चिदानंदरूपस्य ब्रह्मणोऽ
निर्वाच्यमायाशक्तिविजृंभिताऽविद्यायोगात्कालकर्मस्वभावाविर्भूतामहत्तत्त्वोदिताऽहं
कारस्तृतीयोद्भूतवियदादिपंचकेंद्रियदेवतानिर्मिताऽण्डकटाहे चतुर्दशलोकात्मके लीलयात
न्मध्यवर्तिभगवतः श्रीनारायणस्य नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं
कुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य महापुरुषस्यांसितवाराहावतारेणोद्ध्रियमाणाया
मस्यां धरित्र्यां भूर्लोके संज्ञितायां सप्तद्वीपमंडितायां क्षारोदाद्यब्धिद्विगुणद्वीपवलीहतं लक्षै
योजनविस्तीर्णे जंबूद्वीपे स्वर्गस्थितामराद्याश्रितावतारे गंगादिसरिद्भिः पाविते भारतवर्षे॥
निखिलजनपावनपरमभागवतोत्तमशौनकादिवसतिके नैमिषारण्ये। कुमारिकानाम्नि खंडे श्री
भगवतो मार्कंडेयस्य क्रियया कालत्रितयस्य गर्भवराहाचार्यादिगणितानां संख्यायां श्रीब्रह्मणो
द्वितीयपरार्धे श्रीश्वेतवाराहनाम्नि प्रथमकल्पे द्वितीये यामे सप्तमे मुहूर्ते स्वायंभुवस्वारोचिष
उत्तमतामसरैवतचाक्षुषेति षण्मनुनामतिक्रांतानां मतिक्रम्य साम्प्रतं वैवस्वतसप्त
मे मन्वंतरे युगानां त्रिष्वतीतेष्वष्टाविंशतितमे कलियुगप्रथमचरणे श्रीमन्नृपविक्रमार्कसं
वत्सराणां ब्दाहस्य स्वा सानुमानेन यथासंख्याकाब्दिके षोडशशततमे वर्षे श्रीमच्छालिवाहनशाका

© Dharmartha Trust J&K. Digitized by eGangotri

कातुसंख्याकाद्यधिकपंचदशशततमे वर्षे अमुकनाम्नि संवत्सरे उत्तराशावलंबितश्रीमन्मार्तंड
मंडले अमुकऋतौ अमुकमासे पक्षे तिथौ वारे नक्षत्रे योगे करणे अमुकस्थे चंद्रे सवितरि देवगु
रौ शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवंगुणविशिष्टे पुण्ये देशे काले च मम सभार्यस्य सपु
त्रस्य क्षेमायुरारोग्यपरमैश्वर्यसुखप्राप्त्यर्थं परिकल्पितचित्तमनोरथानां सिद्ध्यर्थं आधिव्याधि
जरामृत्युभयशोकनिवृत्त्यर्थं नूतनवत्सरविशिष्टत्रिविधोत्पातशमनार्थं परमैश्वर्यसंपत्त्यर्थं ज
पकर्मनिःपत्त्यर्थं इष्टदेवतावश्यस्थितेपार्श्वस्थाशवलितानिर्वाच्यासुखसाधिगुणायुक्तस्य रुद्रस्य
प्रसन्नताकरणार्थं अस्मिन्महारुद्रारब्धकर्मणि आचार्यादि समस्तऋत्विजां पादप्रक्षालनमहं करि
ष्ये इति संकल्प्य पातु ... कुर्युः इति ते ब्रूयुः। ते च विप्राः पावनाः सर्वे वेदानां ... विप्राः
ष्पनुग्रहं कुर्वन्तु महारुद्रारब्धकर्मणि। स्वस्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः। श्रोत्रियाः सत्यवा
त्यश्च देवध्यानरताः सदा। यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः। अंगीकुर्वंतु मत्कर्म किंकुर्वन्तु मत्क
माशिषः। यथोक्तनियमैर्युक्ता मंत्रार्थस्थितबुद्धयः। यत्प्रसादेन लोकनाथो ... योऽस्मिन्माकर्मणः। स्वा
गतं वो द्विजश्रेष्ठा मदनुग्रहकारकाः। प्रथमं वरमिदं पाद्यं चन्दनैः प्रतिगृह्यतां। अक्षतैः पुष्पैः प्रतिगृ
ह्यतां प्रतिगृह्णामि। अस्मिन्नियमालोके वेदादिपारायणपाठयोग्यस्तेऽपि तेषु आप महारुद्रारब्धकर्म
णि यजुर्वेदमुहूर्तैर्ब्रह्मन्नूह नते पाद्यं पवित्रं गृह्यताम्। पाद्यं। एवं आचार्याणां ऋत्विगादीनां वा त
तः स्वयं पादप्रक्षालनं। पा। आसनं यामः। वरणार्थं ... उपास्ते। मधुपर्कं। अथादि। २॥

© Dharmartha Trust J&K. Digitized by eGangotri

२

आचार्यप्रमुखानां ब्राह्मणानां ऋत्विजां नां पारायणपाठकानां मन्त्रजापकानां वरणमहं करिष्ये। अद्य तां गुरुणा
त्वोजो त्वं प्रवरं अमुकशाखाध्यायिनं अमुकशर्माणं अस्मिन् महारुद्राख्यकर्मणि ब्रह्मत्वेन त्वामहं वृणे। वृतो
स्मि। एवं आचार्यवरणं। आचार्यत्वेन त्वामहं वृणे। जापकत्वेन त्वामहं वृणे। १ ततः पूर्वद्वारे ऋ॰ ऋग्शाखाध्यायिनं पारायणपा
पाठकं त्वामहं वृणे। द्वारपालं त्वामहं वृणे। द॰ यजुःशाखाध्यायिनं पारा॰ द्वार॰। प॰ सामशाखाध्यायिनं पारा॰ द्वार॰।।
३॰ अथर्वशाखाध्यायिनं पारा॰ द्वार॰। गणपतिमन्त्रजापकं। मृत्युंजयमन्त्रजापकं। रुद्रगायत्रीजापकं। जातवेदा
मंत्रजापकं। दुर्गापाठकं। इत्याद्येडायत्रीजपार्थं ग्रहजपार्थं च। ततः आचमनप्राणायामादि वरणान्ते
चै आसनवस्त्रकुण्डलवरणादिनां शक्त्यापेक्षया दानं। तदन्ते मधुपर्कार्चनं। ततः पुण्याहवाचनं। ततः स
र्पान्तरक्षीत्वा भूतोत्सादनं रक्षोहणं वलगहरं रक्षोहणो वो रक्षांसि नागाः रक्षोहा विघ्नवर्णादिनाः। अपस
र्पन्तु ये भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया इति फट् स्वाहान्तं तोयो भूतानां॥ विद्विरै
षन्तु ये भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥
नितिचैरवप्रार्थना। ततः ब्राह्मणप्रार्थना। ब्राह्मणाः संतु शास्तारः पापात्पान्तु समाहिताः। देवानां चैव दा
तारः पातारः सर्वदेहिनां। जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः। देवानां च पितॄणां च तृप्त्यर्थं याजकाः
स्मृताः। येषां देहे स्थिता वेदाः पावयंति जगत्त्रयं। रक्षन्तु सततं ते मां जपयज्ञे व्यवस्थिताः। महारुद्रजपे प्रोक्ताः
ज्याः संतु ते नियमान्विताः। अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। रुद्रध्यानरता नित्यं प्रसन्नमन
सः सदा। मा श्रीफलं ... इति प्रार्थ्य
ततो आचार्यो ... सः। संतुमा संतु परमौनि दकाः। ममापि नियमा विप्रा भवंतु भवतामपि। इति प्रार्थ्य
तंतो आचार्यो ... शांतिघोषेण मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारं प्रविश्य धरा ध्यानं। अधोगत्वा। चतुर्भु
जां शुक्लवर्णां कूर्मपृष्ठोपरिस्थितां। पद्महस्तां शूलधरां सुप्रसन्नां चतुर्भुजां मुखां स्तुतिः। उत्थितासि व

© Dharmartha Trust J&K. Digitized by eGangotri

... स्त्वा॑ति प्राजापत्य ...
विष्णुरुः गायत्री । द्यावापृथिव्योर्देवते ... या ... पृथि ... अथर्वणो ... अनुष्टुप् ...

राहेणा कृष्णेन शतबाहुना । दंष्ट्राग्रे द्युती या देवि यज्ञार्थं प्रणमाम्यहं ॥ त्वमेव रत्नगर्भासि रत्न-
स्सागरसंयुता । पृथिव्यां पर्वताः सर्वे वसवो लोकपालकाः । बीजानि विविधानीह प्ररोहंति तथा त्वयि ।
नानाकर्मसु कुशलेसु स्थिराशेषण संस्थिता । नानादेवैस्तु संपूज्या वसुधे त्वां नमाम्यहं ॥ पृथ्वि त्वया
धृता॰ त्वं च॰ पवित्रं कुरु मंडलं । इति स्तुत्वा ऽ द्वीं निधाय प्रणमेत् ॥ ततस्तत्रैवोपवेशनं । तंडुलमयं अ
ष्टदलं कृत्वा तत्र वर्धनि कलशस्थापनं । हूं रसि हूं संस्पर्शः । आजिघ्र कलशं कलशं निधाय ।
महीद्यौ वरि स्परसां । या ओषधीः पूर्वा सर्वौषधि प्रक्षेपः । हिरण्यगर्भ इति हिरण्यं निधाय । अश्वत्थे व
3
पंचपल्लवनिधानं । सुवर्णादि दधि सा कृतं पात्रं । याः फलिनीर्या अफलिके राः सुजातो ज्योतिषा वस्त्रं पंच
रत्नं परि वाजपतिः ॥ मनोजूतिः प्रतिष्ठा । वंदनपूर्वार्धवर्धनीपूजा । ततः प्रार्थना । मन्त्रयित्वं महा
चागामहातीर्थोदकान्विता । वर्धनी त्वं जयन्मातन्नवत्वं कुलवर्धनी । तव तोयेन कलशान जपार्थं
ह्र रयाम्यहं । इति वर्धनीप्रार्थना । ततः । अष्टदलेमकुलाव्यापि प्रक्षालितानेकादशन वान्यूर्णान्सह्रि
रत्नपान्सवस्त्रान्फलपुष्पोपशोभितानां गोदकाक्षतयुतान्स्थापयेत् । वर्धनावतु । गंधादिभिः पूजा ॥
ततः कलशानां प्रार्थना । देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोसि तदा कुंभ विधृतो विष्णु
नास्वयं । त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।
शिवः स्वयं त्वमेवासि त्वं विष्णुस्त्वं प्रजापतिः । आदित्या वसवो नागा विश्वेदेवाः सपैतृकाः । त्व
यि तिष्ठंति कलशो सर्वकामफलप्रदाः । त्वत्प्रसादान्महारुद्रं कुंभमीदृजलोद्भवाः स्थानि ध्यांकु
रु देवेश प्रसन्नो भव सर्वदा । पंचैकादशस्त्वेषु तेषु कलशेषु ३ ॥

हिरण्यगर्भ इति हिरण्यमा ... त्रिष्टुप् ... हिरण्यप॰ वि॰ ८ ... प्रजापतिः ... अथर्वणो ... अनुष्टुप् ... पंचयो
देव॰ पंचपल्लव॰ ... सौवर्ण ... त्रिष्टुप् ... याः फलिनीरिति अथर्वणो ... अनुष्टुप्
... पद॰ ... सुजातो ...

© Dharmartha Trust J&K. Digitized by eGangotri

वर्णमयः रूपमयो वा एकादश रुद्रमूर्तयः स्थाप्याः । तेषां नामानि । तेषां अग्न्यकारणां समु
द्रस्य त्वा । हिमस्य त्वा । अपामिदं । नमस्ते हरसे । प्राणदा अपानदा । तासां प्रतिष्ठा । ततः पंचाम
तैः स्नपनं पंचमन्त्रैः । ततः ॐ त्वे स्थापनं । तेषां नामानि । अघोरं । पशुपतिं । शर्वं । विश्वरूपं । वि
रूपं । त्र्यंबकं । कपर्दिनं । भैरवं । शूलपाणिं । ईशानं । महेशानं ॥ ११ ततः द्वारे द्वारे घटद्वंद्वस्थाप
नं । अप्रकृतग्रहयज्ञस्येशान्यां ग्रहपीठे ग्रहस्थापनं यथोक्तं । अष्टैत वास्तुक्षेत्रे तदा नैर्ऋ
त्ये वास्तुपीठे वास्तुदेवतास्थापनं । शान्तिक एव नैऋत्यां चेद्वा वायव्यां योगिनीपीठे योगि
नीनां स्थापनं । ततः प्रतिष्ठा स्थापितानां ॥ अयं मंडपो रुद्रैकादशग्रहवास्तुयोगिनीकं आदि
कैः सर्वांगयुक्तैः सुप्रतिष्ठितो भवतु । अथवा प्रत्येकं । अपसरन्त्वा इति रुद्राः स्थाप्याः । आवा
हनं । आयं कुसान्निधा रुद्राः कलशस्थाः सुमन्त्रिषु । रुद्रा ईसहिताः सर्वे सगणाः सामरु
द्गणाः । स्थापितानां पंचोपचारैः पूजनं । ततो मंडपसबलीकरणं । जापकानां जपपाठकानां य
वेदिकायां यंत्रस्थापनं ॥ वेदिकायां यजमानं आचार्य ब्रह्मास
दस्यमिति अनुज्ञा दातव्याः । वेदिकायां स्वासने उपविशति । आचमनं प्राणायामः अथादि यजमा
षित उपविशति । जापका अपि स्वासने उपविशन्ति । रुद्रप्रीत्यर्थं एकादशन्याससहितरुद्रन्यासजपमहं करि
नस्य वाचिकतार्थसिद्ध्यर्थं मम रुद्रप्री । अथ षडंगः पुरुषन्यासः ॥ ॐ कंदः पुरुषाय नमः शि
ष्ये इति संकल्प्य रुद्रविधानं कुर्यात् । विश्वामित्र ऋषि
गौतम भरद्वाज न्यासे नमः नेत्रयोः ।
...पादिन्यासः । सामम्नः । वि... प्रयये नमः शिः गायत्र्यादि छंदेभ्यो नमः मुः रुद्रो देवता ...
...संपुष्टे । नमः शान्तिः पादयोः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

...ति प्राणा... स्व प्रमाण...
...श्री ता वाच्यं ततः मंत्रादौ प्रणवं कार्यं मंत्रांते प्रणवः ... अनष्टपा...
... ॐ भूः ॐ भुवः ॐ स्वः ॐ भूर्भुवःस्वः प्रणवपुटाः सर्वे मंत्राः कार्याः। २४ ...

दग्निभ्यां नमः। श्रोत्रयोः। वसिष्ठभरद्वाजाभ्यां नमः नासिकयोः। अत्रये नमो वाचि। गा
यत्रीछंदसे ऽग्नये नमः शिरसि। उष्णिहछंदसे सवित्रे नमः। ग्रीवायां। बृहतीछंदसे बृह
स्पतये नमः ऽनुके। बृहद्रथंतराभ्यां द्यावापृथिवीभ्यां नमो बाह्वोः। त्रिष्टुप्छंदसे इन्द्राय
नमो मध्ये। जगत्यैछंदसे आदित्याय नमः श्रोण्योः। अतिछंदसे प्रजापतये नमो लिंगे।
यज्ञाय यज्ञियाय वैश्वानराय नमः पायौ। अनुष्टुप्छंदसे विश्वेभ्यो देवेभ्यो नम ऊर्वोः। प
ङ्क्तिछंदसे मरुद्भ्यो नमो जान्वोः। द्विपदायै छंदसे विष्णवे नमः पादयोः। विराट्छंदसे वायवे न
मः प्राणेषु। एकनाक्षरछंदसे ब्रह्मणे नमो। सर्वांगे। ततः पुरश्चरणं ॐ भूर्भुवःस्वः देवो
रिष्टं गा। श्वा। जातवेदसे। श्वा। अक्षरं ब्रह्म सदनं देवानां शिरमुत्तमं। जातवेदछंदसां मात
ब्रह्म भूर्भुवःस्वः ततो प्रणवव्याहृति संयुक्तं चतुस्त्रिकिरिशासनं। या ते रुद्र शिवा तनूरघो
रेति परमेष्ठी। अनुष्टुप्। एको रुद्रो देवता शिखायां वि। अस्मिन्महत्यर्णव इति परमेष्ठी। अ
नुष्टुप्। बहवो रुद्रो देवता शिरसि वि। सहस्राणीति परमेष्ठी। अनुष्टुप् एको रुद्रो। ललाटे।
वि। हंसः शुचिषदिति वामदेवः अतिजगती सूर्यो भ्रुवोर्मध्ये वि। त्र्यंबकमिति वसिष्ठः अ
नुष्टुप् रुद्रो। नेत्रयोः। नमः स्रुत्याय च पथ्याय चेत्येतावंतो मंत्रस्येति परमेष्ठी आसुरी त्रि
ष्टुप् कर्णयोः। मानस्तोक इति कुत्सः जगती रुद्रः नासिकायां। अवतत्ये
...परस्यो रुद्रो देवतेति

४॥

© Dharmartha Trust J&K. Digitized by eGangotri

तिपरमेष्ठी अनुष्टुप् रुद्रः मुखे। नीलग्रीवा इति द्वयोः परमेष्ठी अनुष्टुप् बहवो रुद्रो कंठे।
नमस्त आयुधायेति परमेष्ठी अनुष्टुप् एको रुद्रो बाह्वोः। याते हेतिरिति परमेष्ठी अनुष्टु
प् एको रुद्रो उपबाह्वो वि॰। उपबाहुमोरि(?) [illegible] परिभागः। ये तीर्थानीति परमेष्ठी अनुष्टु
प् बहवो रुद्रो हस्तयो वि॰। सद्योजातं सद्योजात बृहती अग्नि(?) अंगुष्ठयो वि॰। सद्योजा
तं अंगुष्ठाभ्यां नमः। वामदेवायेति वामदेव पंक्तिः धाता(?) विष्णुः। तर्जनीभ्यां नमः। अघो
रेभ्यो अघोर अनुष्टुप् रुद्रः। मध्यमाभ्यां नमः। तत्पुरुषायेति तत्पुरुष गायत्री रुद्रः अना
मिकाभ्यां नमः। ईशान इति ईशान बृहती शर्वः कनिष्ठिकाभ्यां। नमो वः किरिकेभ्य इति पर
मेष्ठी आस्तु पुलिङ्ग(?) किरिकादयो बहवो रुद्रो। हृदये वि॰। नमो गणेभ्यो गणपतिभ्यश्च
वो नम इति परमेष्ठी आस्तु पुलिङ्ग(?) गणादयो रुद्रो पृष्ठे। नमो हिरण्यबाहवे सेनान्ये दि
शां च पतये नम इति परमेष्ठी यजुः हिरण्यबाह्वादयो देवो पार्श्वयो वि॰। हिरण्यगर्भ इति हि
रण्यगर्भ त्रिष्टुप् को देवो नाभौ वि॰। मीढुष्टम इति परमेष्ठी त्रिष्टुप् एको रुद्रो देवः कट्यां वि॰।
ये भूतानामधिपतय इति परमेष्ठी अनुष्टुप् बहवो रुद्रो गुह्ये वि॰। अप्सरं(?) ब्रह्म [illegible] देवा
नां शिरमुत्तमं। जातवेदश्छन्दः सोमात(?) अग्नि [illegible] देवः स्वरो इति शिरः। एवं सशिरसो जातवेद
सो निरूपणं। सशिरसो जातवेदसे सुनवाम सोममित्यस्यापापानो वि॰।

© Dharmartha Trust J&K. Digitized by eGangotri

मानोमहान्तमिति कुत्स· जगती। एको रुद्रो देवता ऊर्वोर्वि· एषत इति प्रजापति· सामपङ्क्तिः
रुद्रो· जान्वोः स्वरिपुहस्तोरिति अप्रतिरथ त्रिष्टुप् रुद्रो· जंघयोर्वि·। विश्वं भूतं भुव
नं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो ऽस्त्विति गु
ल्फयोः। येषामिति परमेष्ठी अनुष्टुप् बहवो रुद्रो देवता पादयोर्वि· अध्यवोचदिति परमे
ष्ठी· पङ्क्तिः। एको रुद्रो देवता कवचे वि·। नमो बिल्मिने च कवचिने च स्पेतावतो मम ज्येष्ठस्य परमेष्ठी·
अपास्तुरीपङ्क्तिः बिल्मि कवचिनौ रुद्रौ देवता। उपकवचे वि·। नमो ऽस्तु नीलग्रीवायेति पर
मेष्ठी· अनुष्टुप् एको रुद्रो· तृतीयनेत्रे वि·। प्रमुञ्च धन्वन इति परमेष्ठी· अनुष्टुप् एको रु
द्रो· अस्त्रे वि·। एतावन्तश्चेति परमेष्ठी· अनुष्टुप् बहवो रुद्रो देवता दिग्बन्धे वि·। इति प्रथ
मः। अथ द्वितीयः। ओं नमो भगवते रुद्रायेति शिरसि न्यसेत्। ओं ह्रां धूं। नं नासाग्रे मों ललाटे भ
मुखे। गं कण्ठे। वं हृदि। तें दक्षिणहस्ते रुं वामहस्ते ओं नाभौ द्रां यं पादयोः। इति द्वितीयः। अथ
पञ्च तृतीयः। सद्योजातमिति पादयोः। वामदेवायेति ऊर्वोः। अघोरेभ्य इति हृदये तत्पुरुषायेति
मुखे। ईशानः सर्वविद्यानामिति मूर्ध्नि। हंसः हंस इति वा। इति तृतीयः। एवं न्यासविधिं कृत्वा ततः संपुट
मारभेत्। त्रातारमिन्द्रमिन्द्रमिति गर्ग। त्रिष्टुप् इन्द्रो· त्रातारमिन्द्र। त्वं नो अग्ने इति हिरण्यस्तूप
आङ्गिरसः। जगती। अग्निः। चं नो अग्ने स्कन्नमनुपश्यामिति प्र

ज्या। तद्रुपत्नानां अग्रस्य विशिष्टिनं यजुः। त्रिमंदधातु। पाइ ष्टुत्रपसो वा ॥ अनिष्ठाः स्ना सं तनोमि द्रा विष्टु

जापतिः। त्रिष्टुप्। यमो दे। स्तुगनुपंथां। ॥ अस्तुन्वतमिति प्रजापतिः त्रिष्टुप् निर्ऋतिर्दे। ॥ अ 3
स्तुन्वत। तचा यामीति शुनःशेपो त्रिष्टुप् वरुणो दे। तचा यामि। ॥ अपानौ नियुङ्क्षि रिति व
सिष्ठः। त्रिष्टुप् वायुर्दे। ॥ अपानो नियुङ्क्षि। वयं सोमेति बंधुः गायत्री। सोमो। वयं सोम।
तमीशानमिति गोतमः जगती। ईशानो। तमीशानं। ॥ अस्मै रुद्रा इति प्रगाथः त्रिष्टुप्। त्र्यं
त्नो दे। ॥ अस्मै। स्योना पृथिवीति मेधातिथि गायत्री द्यावापृथिव्यौ देवते। स्योना।
संपुटीकरणं। नमस्कारे विनियोगः। पुनरेभिर्मंत्रैरिंद्रादीनां तत्तद्दिक्स्थेन नमस्का
रः कर्तव्यः। इंद्राय नमः। ॥ अग्नये। यमाय। निर्ऋतये। वरुणाय। वायवे। सोमाय। ईशाना
य। ब्रह्मणे। ॥ अनंताय। स्वं पुटांतः छिन्नाः संपुटीकरणं। एवमात्मनिरोधीकरणं कृत्वा
च गस्त्रिगतैः पापैः प्रमुच्यते। स घोरैर्गैः प्रमुच्यते। सर्वभूतेष्वपराजितो भवति। यदा
र को गं सर्वभूतप्रेतपिशाचब्रह्मराक्षसयमदूतशाकिनीडाकिनी सर्पश्वापद त
स्करादुपद्रवाः सर्वे ज्वलंतं पश्यंति। मा रक्षं तु ॥ अथ गुह्यादिमंत्राणामथ मे
व चतुर्थो न्यासः। मनो ज्योतिरिति प्रजापतिः। त्रिष्टुप्। अपसो गुह्ये वि। ॥ अबोध्य
ग्निरिति बुधगविष्ठिरावृषी त्रिष्टुप्। ॥ अग्निर्देवता उदरे वि। मूर्धानमिति भरद्वा
जः त्रिष्टुप्। वैश्वानरो दे। हृदये। मर्माणि ते इति प्रजापतिः। त्रिष्टुप्। लिंगोक्ता दे। ॥ आस्ये।

© Dharmartha Trust J&K. Digitized by eGangotri

जातवेदा यदि वा पावकोसि वैश्वानरो यदि वा वैद्युतोसि। शं प्रजाभ्यो यजमानाय
लोकमूर्जं पुष्टिं दददभ्यावर्त्तस्वेति शिरसि। अथ पंचवक्त्रन्यासः। चंद्ररुद्राय नमः
शिरसि। चंद्रशेखराय नमः ललाटे। त्रिलोचनाय नमः नेत्रयोः। भैरवाय नमः श्रोत्रयोः।
श्रीकंठाय नमः घ्राणे। पशुपतये नमो मुखे। नीलग्रीवाय नमः कंठे। व्यापकाय नमः हृदि।
गंगाधराय नमः करयोः। शिवाय नमो नाभौ। वामदेवाय नमो गुह्ये। त्र्यंबकाय नमो जं-
घयोः। सर्वज्ञाय नमः पादौ। शिवाय नमश्च रुद्रि रु। पादयोः कालाग्निरुद्राय नमः
ऊर्वोः कुमाराय नमः। कंठे नीलग्रीवाय नमः। ललाटे शशिभूषणाय नमः। शिरसि
शिवाय नमः। शिखायां सदाशिवाय नमः। इति पंचमः। पादयोः भवाय नमः। ऊर्वोः श-
र्वाय नमः। गुह्ये ईशानाय नमः। नाभौ पशुपतये नमः। ललाटे भीमाय नमः। शिरसि
महते नमः।। भवाय शर्वाय ईशानाय पशुपतये भीमाय महते कवचाय हुं।। एवमे-
व सर्वैरस्त्राय फट्। इति षष्ठः।। उपे ऽपं धस्स्पते इति पादयोः। इमा रुद्राय जान्वोः।
यातेरुद्रेत्यूर्वोः। परितो गुह्ये। मा तुष्टम नाभौ। विकिरिद हृदये। सहस्राणि कंठे।
ऽसंख्याता मुखे। ऽस्मिन्महति नासिकायां। नीलग्रीवा नेत्रयोः। नीलग्रीवा
शितिकंठाः शर्वा ललाटे। ये वृक्षे शाष्पि। येऽन्ततोनां कवचाय हुं। ऽनेनैवास्त्राय फट्।

६।

शितिकंठादिवटरुद्राः।

© Dharmartha Trust J&K. Digitized by eGangotri

८५

॥ पपडंगः १

इति सप्तमः । यज्जाग्रतश्च सप्तमन्त्राणां शिवसंकल्प ऋषिः । त्रिष्टुप् छन्दः । मनो देवता
हृदये विनि॰ यज्जाग्रत रु॰ ६ हृदयाय नमः । सहस्रशीर्षेति षोडशानां ऋचां नारायण पु
रुष ऋषिः पञ्चदशानामनुष्टुप् षोडश्यास्त्रिष्टुप् जगद्बीजं पुरुषो दे॰ । शिरसि विनि॰ सहस्र
शीर्षा रु॰ १६ शिरसे स्वाहा । अद्भ्यः संभृत इत्यादीनां षण्णां नारायण पुरुष ऋषिः आद्यानां ति
सृणां त्रिष्टुप् द्वयोरनुष्टुप् अन्त्यस्य त्रिष्टुप् आदित्यो दे॰ । शिखायां विनि॰ अद्भ्यः शिखायै
वौषट् । आशुः शिशान इति सप्तदशर्चस्य अप्रतीरथ ऋषिः द्वादशानां त्रिष्टुप् द्वयोरनुष्टुप् ।
पञ्चदश्यास्त्रिष्टुप् षोडश्याः पंक्तिः सप्तदश्यास्त्रिष्टुप् द्वादशानामिन्द्रो दे॰ त्रयोदश्या इषुः ।
चतुर्दश्या योधाः पञ्चदश्या मरुतः । षोडश्याः सप्तदश्या लिंगोक्ता दे॰ । कवचे विनि॰ । आशुः ॥ १७
कवचाय हुं । विभ्राड् बृहदिति विभ्राट् सौर्य ऋषिः जगती । जगती विश्वे देवा देवता । अ
यं वेन इति वेन ऋषिः त्रिष्टुप् सोमो॰ । त्रिष्टुप् सूर्यः । यदद्येति श्रुतकक्ष ऋषिः । गायत्री सूर्यः
तरणिरिति प्रस्कण्व॰ गायत्री । सूर्यः । तत्सूर्यस्येति मित्रस्येत्यनयोः । कुत्स त्रिष्टुप् सू
र्यो । बण्महानिति जमदग्नि बृहती सूर्यः । बट् सूर्येति जमदग्निः सतोबृहती सूर्यः ।
आयन्त इवेति नृमेध बृहती सूर्यः । अद्या देवा॰ कुत्सः सूर्यः । आकृष्णेनेति हिरण्य
स्तूप आङ्गिरस त्रिष्टुप् सूर्यः नेत्रत्रये वि॰ । विभ्राड् बृहत् रु॰ ११ नेत्रत्रयाय वौषट् । अथ
शतरुद्रियमन्त्रं । नमस्ते रुद्र इत्यादि षष्टिकण्डिकानां अनेको देवता परमेष्ठ्यादिना

© Dharmartha Trust J&K. Digitized by eGangotri

..नरुद्रो ऽसुरो महो दिवः रु१८ वाद्दे वेभ्युः अयस्य इन्यारम्भ
वयं स्याम पतयो रयीणां न्यूह्नुः स्वः स्वाहा इत्यनपशिष्टो ऽस्याप ऽप्रस्य न्यासे वि० १ पश्री
फट्
नो रुपयः गाय आदि नानाक्षं दास्ति ब्रह्मचो रुद्रो देवता। नमस्ते पीठं इंगकां पठित्वा ऽप
स्त्राय फट् इत्यस्य पश्चमो न्यासः। शितस्तिकस्यादि ऽपपाष्टमंत्रैः प्रणामाष्टकं हिरण्यगर्भः स
रु१ यः प्राणतः २ कृत्स्नं ३ न्याना ३ महीचो: ४ ऽपश्चासस्य ५ ऽग्ने नय ६ यातेऽग्ने यज्ञियर्ति
यो तनूस्ते गा रौद्रा मा त्वा ऽपश्च वसहे नि रुद्रएव तु सेन यांपु रु ह्री। पश्चात्त्वा
यज्ञमा सौदस्वां योनिं जातवेदो भुवः ऽप्रजायमानः स्वर्दृष्यं ए (हि) ७ यथा चः स्या
ता स्नयेदा रौमपरीडा निर्दृत वो श्रुहवैः। तेन्निनो ऽग्ने ऽमितेमर्होनिः पा
तं पृच्छिं रायं सीं न्विमिं पाहि। ८। इत्यष्टांगप्रणामः। अथा ध्यानं रुद्ररूपं ध्यायेत्।
शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकं गंगाधरं दशभुजं सर्वाभरणभूषितं। नीलग्रीवं
शशांकांकं नागयज्ञोपवीतिनं। व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं। कमंडल्वक्षसूत्राभ्यां
मन्वितं शूलपाणिनं। ज्वलंतं पिंगलजटाजूटमुद्योतकारिणं। ऽमृतेनाप्लुतं हृष्टमुमादेहा
र्धधारिणं। दिव्यसिंहासनासीनं दिव्यभोगसमन्वितं। आदिदेवतासमायुक्तं सुरासुरनम
स्कृतं। नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययं। ५॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणं॥
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत्॥ ६॥ ततः ऽनुगुप्ते सुजिते गोचर्ममात्रे देशे स्थंडिले
शालितंदुलैरंबुजं परि लिख्य पूजादिकं कुर्यात्॥ पीठपूजायां मंत्रक्रमः। शं नमः शंभवाय इति मं
त्रेण। नमः शंभवाय इत्यस्य मंत्रस्य परमेष्ठी ऋषिः ऽपास्यनुष्टुप्छंदः आदिदेवीनी छं दांसि शंभवादयो रु
द्रा देवता। पूजायां वि०। मानोमहांतमिति कुत्स ऋषिः जगती। एको

© Dharmartha Trust J&K. Digitized by eGangotri

रुद्रो देवतेत्यादि सिद्धमंत्रस्मरणे वि० । ऋतगायत्र्या ईश्वरस्यां त्वरासीति प्रजापतिप्रस्तार
पङ्क्तिः स्वयमाराधनादे दैवत्र्यक्षो वि० ॥ आपो अस्मानिति प्रजापतिरार्षो नुष्टुप् आपो दे-
अप्पां संचरणे वि० । आपो अस्मानिति प्रवं हृन्तु देवीरित्संतो मंत्रः । तानि रक्षितं त्मानमुप
स्कारांश्च प्रोक्षयेत् । नमः शंभवायेति मंत्रेण । नमस्तु स्थाणवे इति परमेष्ठी अस्तुरी त्रिष्टुप् स्तु
त पथ्यो देवता । पीठकल्पने वि० । ततः पीठपूजा ॥ मध्ये । मूलप्रकृत्यै नमः ॥१ आधारशक्त्यै । कूर्माय । अ
नंताय । पृथिव्यै । श्वेतद्वीपाय । कल्पवृक्षाय । रत्नमंडपाय । सिंहासनाय नमः ॥८॥ प्रागादि चतु
र्षु दिक्षु । धर्माय । ज्ञानाय । वैराग्याय । ऐश्वर्याय ॥४ विदिक्षु । अधर्माय । अज्ञानाय । अवैराग्याय ॥
अनैश्वर्याय ४ पुनः मध्ये । आत्मने । अंतरात्मने । ज्ञानात्मने । परमात्मने । अग्निमंडलाय । सो
ममंडलाय । सूर्यमंडलाय । सत्त्वात्मने । रज आत्मने । तम आत्मने । सर्वशक्तिकमलासनाय ॥
अष्टपत्रपूर्वादिदष्टदलेषु वामायै । ज्येष्ठायै । रौद्र्यै । काल्यै । कलविकरण्यै । बलविकरण्यै । बल
प्रमथन्यै । सर्वभूतदमन्यै । मध्ये मनोन्मन्यै । पीठे नमो भगवते सकलगुणात्मशक्तियुक्ता
य अनंताय योगपीठात्मने नमः । आवाहनं । आ त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः
सहकेतुमद्भिः वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम् । हृदयं तां देवानांद्र
पीडावसनुष्याणां शर्वेशः । सहस्राक्षं वीरूपाक्षं महादेवं शिवमावाहयामि । पादादि आत्म
स्याऽऽसनं । नमो भगवते रुद्राय ॥१॥ सद्योजातं वामदे
वद्दे वमूर्तौ सद्याद्यादि दशाक्षरमंत्रस्य ॥ आसनं ॥

४ न्यासः १

आवाहनं २

© Dharmartha Trust J&K. Digitized by eGangotri

वामाय २ अघोरेभ्यो ३ तत्पुरुषाय ४ ईशानः ५ इति पंचमंत्रैर्न्यासः। नमस्ते रुद्र इत्यावाहनं।
या ते रुद्र इत्युपवेशनं। ओं त्रिपुरं भैरवायोगः। शिवेन मनसा अधिवासः। असौ यस्ताम्र इति
देवतान्यासः। असौ यो वसर्पतीत्युपसर्पणं। नमोस्तु नीलग्रीवायेति पाद्यं। तत्पुरुषायेत्यर्घ्यं।
[illegible]रसीत्याचमनं। ततः पंचामृतस्नापनं। पयः पृथिव्यामिति [illegible] विराडनुष्टुप् रुद्रो।
पयस्नाने वि०। दधिक्राव्ण इति वामदेवो दधिक्रा [illegible] अनुष्टुप् रुद्रो दे० दध्नास्नाने वि०। मधु वाता
इति [illegible] गोतमो गायत्री रुद्रो दे० मधुस्नाने वि०। घृतं घृतपावान इति दविरसि स्वाहेत्यस्य
यजुषः प्रजापतिर्ऋ० रुद्राः पंक्तिः छं० रुद्रो दे० घृतस्नाने वि०। अपां रसमिति [illegible] इक्षुरसस्येति ऋ० अ
नुष्टुप् रुद्रो दे० शर्करास्नाने वि०। नमस्ते रुद्र इत्यापोहिष्ठेति कलशैः स्नपनं। मानस्तोके
ति पुनः स्नानं। प्रमुंच धन्वन इति कौपीनं। विज्यं धनुरिति कपर्दिकाबन्धः। नमः शंभवाय चेति
सिंहासने स्थापनं। आवाहनमुद्रया भगवन् रुद्र आवाहितो भवेति पुष्पांजलिः पूरि
तोंजलिरावाहनमुद्रा।१ स्थापितो भवेति स्थापनमुद्रया सेवन्त अंजलिः २ संनिधान
मुद्रया संनिहितो भव। मुष्टियुगलमेकीकृत प्रोन्नतांगुष्ठयुग्मं सा।३। संनिरोधमुद्रया
संनिरुद्धो भव। मुष्टियुगलं गर्भितांगुष्ठयुग्मं संनिरोधिनी।४। सकलीकरणमुद्रया। सक
लीकृतो भव। देवतांगेषु षडंगन्यासः सकलीकरणमुद्रया।५। अवगुंठनमुद्रया अवगुंठितो भ
व। वामहस्तकृतमुष्टिरूर्ध्वस्पष्टतर्जनी अवगुंठनी तया परितो भ्राम
णं।६।।

© Dharmartha Trust J&K. Digitized by eGangotri

नरूप
वर्णं रूपं

धेनुमुद्रयामृतीकृतो नवरत्नं मुखयोर्हस्तयोरंगुलीपुंसां श्लिष्टासु अंगुलानिव
वक्रीकृत्य हस्तयोस्तर्जनीमध्यमयोः संसर्गः तथानामिकाकनिष्ठिकयोः संयोगो
स्तनरूपा धेनुमुद्रा॥ महामुद्रया परमीकृतो नवो अन्योन्यं ग्रथितांगुष्ठप्रसारितसर्वांगुलैः
उपस्थानं महामुद्रा॥ नमो हिरण्यबाहवे इति वस्त्रं। आचमनं नमोऽस्तु स्रुवइत्युपवीतं। आचम
यातेरुद्रेति रितिवद्गंधेनास्त्रसमर्पणं। नमः श्वभ्य इति गंधं। नमः पार्यायेति पुष्पं। नमो
वास्तायेति धूपं। नमः आशवे इति दीपं। नमो ज्येष्ठायेति नैवेद्यं। आ॰। नमः शंभवायेति गं
डुपं। नमः शंभवायेति तांबूलं। दशाङ्गेन नमस्कुर्यात्। नमः शंभवायेति प्रदक्षिणा। तेनैव
दक्षिणा। नमो रुद्र स्रुवे स्याराज्ञिकं॥ नमः शंभवायेति तंदुलैः पूजनं। अथ पंचवक्त्रपूजनं। ततः म
हादेवस्य वामभागे चंदनपुष्पैरक्तैश्च पार्वतीं पूजयेत्। ओं नमो भगवत्यै उमादेव्यै नमः॥
पार्वत्यै। शंकरप्रियायै। गौर्यै। कान्त्यै। कालिन्द्यै। कोटर्यै। विश्वंभरयै। चित्रधारिण्यै। ह्रां ह्रीं
गंगायै। गंगादेव्यै। शाम्भव्यै नमः। सद्योजातसंज्ञके पश्चिमवक्त्रे सद्योजातमंत्रं न्यसेत्। धनु
र्बाणमुद्रां दर्शयित्वा प्रणमेत्। तत्र मध्यमे हस्ते मध्यमाग्रं तर्जन्यौ नियोज्यांगुष्ठेन अना
मिकाकनिष्ठां वामस्यैव निपीडयेदेवं धनुर्मुद्रा दक्षिणे स्कंधे स्थापयेत्। दक्षमुष्टिस्थत
र्जनी दीर्घा बाणमुद्रा। श्वेतवर्णाय हंसवाहनाय पृथिवीतत्त्वाय स्फटिकरूपात्मने। ब्रह्म

© Dharmartha Trust J&K. Digitized by eGangotri

तो-ऽष्टाष्टकलासहिताय सद्योजातसंज्ञाय पश्चिमवक्त्राय नमो नमः॥ हृद्यै नमः॥
सिद्ध्यै। ऋद्ध्यै। लक्ष्म्यै। मेधायै। कान्त्यै। स्वधायै। प्रज्ञायै॥ मनःशिलाचंदनेन। श्वेताक्षतैः श्वेतपुष्पैः॥
गुग्गुलधूपेन। घृतदीपेन। पायसनैवेद्येनोपचारः॥ ध्यानं। प्रालेयामलबिंदुकुंदधवलं गोक्षी
रफेनप्रभं। भस्माभ्यंगमनंगदेहदहनज्वालावलीलोचनं। ब्रह्मेंद्रादिमरुद्गणैः स्तुतिपरैर
भ्यर्चितं योगिभिर्वंदेहं सकलं कलंकरहितं स्थाणोर्मुखं पश्चिमं॥ इति पश्चिमवक्त्रपूजनं॥
वामदेवाय नम इति वामदेवसंज्ञिके मंत्रेणोत्तरवक्त्रे न्यसेत्। संपुटांजलिं कृत्वा तदंगुष्ठ
मिलितावुन्नतांगुलीः संमुखाय पद्ममुद्रां दर्शयेत्। गरुडवाहनाय गौरवर्णाय चतुर्मा
पस्ताय ऽप्रमत्तरूपाय रजःप्रवृत्तित्रयोदशकलासहिताय वामदेवसंज्ञकायो
त्तरवक्त्राय नमः॥ ह्रीं॥ रजसे। रक्षायै। रत्यै। पाल्यै। कामायै। संजीवन्यै। क्रियायै।
बुद्ध्यै। क्रियायै। धात्र्यै। भ्रामण्यै। मोहिन्यै। जरायै॥ १३ हरिचंदनेन। तुलसीशतप
त्रपुष्पैः। कंकोलपूगकर्पूरजातीलवंगसुगंधपंचसौगंधिकेन धूपेन। घृत
दीपेन। गोधूमान्नघृतपक्वेन नैवेद्येनोपचारः॥ ध्यानं। गौरं कुंकुमपिंजरं सु
तिलकं व्यापांडुगंडस्थलं भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलं॥
स्निग्धं बिंबफलाधरं प्रहसितं नीलालकालंकृतं वंदे पूर्णशशांकमंडलनिभं वक्त्रं हर

© Dharmartha Trust J&K. Digitized by eGangotri

स्योत्तरे। इत्युत्तरवक्त्रे पूजनं। ॐ अघोराय नम इति अघोरसंज्ञकं मंत्रं दक्षिणवक्त्रे न्यसेत्।
तर्जन्यंगुष्ठसंयुक्ते दीर्घांगुलित्रयं हृदि विन्यस्य वामहस्तं ध्यानं कमलरूपं वामजानुमू
र्ध्नि विन्यसेत्। एषा ज्ञानमुद्रा तां दर्शयित्वा। कूर्मवाहनाय नीलवर्णाय तेजस्तत्वाय विश्वरू
पात्मने नमः प्रचन्द्राष्टकलासहिताय अघोरसंज्ञकाय दक्षिणवक्त्राय नमः। हूं। तमसे।
मोहायै। रक्षै। रक्षायै। व्याधये। मृत्यवे। क्षुधायै। तृष्णायै। कृष्णागरुचंदनेन नीलोत्प
लकणावीरपुष्पैः। श्वेतागरुधूपेन घृतदीपेन माषान्ननैवेद्योपचारैः। ध्यानं। कालाञ्ज
नमसंजनावलनिभं व्यावर्तपिंगेक्षणं खंडेंदुद्वयमिश्रितांश्रुदशनप्रोद्भिन्नदंष्ट्रांकुरं।
सर्पप्रोतकपालसक्तिकिसकुलं व्याकीर्णसक्केखरं वंदे दक्षिणमीश्वरस्य कुटिलं भ्रू
भंगरौद्रं मुखं। इति दक्षिणवक्त्रे पूजनं। ॐ तत्पुरुषाय नम इति तत्पुरुषसंज्ञकं मंत्रं
पूर्ववक्त्रे न्यसेत्। करद्वयं हृद्यंगुलयः स्कंधे निधायेति कवचमुद्रां तां दर्शयित्वा।
वृषवाहनाय रक्तवर्णाय वायुतत्वाय चैतन्यात्मने निवृत्त्यादि चतुःकलास
हिताय तत्पुरुषसंज्ञकाय पूर्ववक्त्राय नमः। हैं। निवृत्त्यै। प्रतिष्ठायै। विद्यायै। शांत्यै।
हरितालचंदनेन। दूर्वांकुरार्कपुष्पैः। कृष्णागुरुधूपेन। घृतदीपेन। मोदकान्नैवेद्येनो
पचारैः। ध्यानं। संवर्ताग्नितडित्प्रतप्तकनकप्रस्पर्धितेजोरुणं। गंभीरस्मितनिः
सृतोग्रदशनप्रोद्भासिताम्राधरं। बा

© Dharmartha Trust J&K. Digitized by eGangotri

लेंइ धृतेंदुघनतिलोलपिंगलजटाभारप्रबद्धोरगं वंदे सिद्धसुरासुरेंद्रनमितं सर्वंमुखं शूलिनः॥
इति सर्ववक्त्रपूजनं॥ तमीशान इति ईशानसंज्ञके मंत्रे ऊर्ध्ववक्त्रे न्यसेत्। संयुक्तमुलौ व्यस्तांगु
लिकौ उत्तानौ करौ व्यापकमुद्रां तां प्रदर्शय। ऊं पञ्चवाहनाय पीतवर्णाय। आकाशतत्त्वाय सर्व
व्यापकात्मने। ऊर्ध्ववक्त्राय। शशिन्यादिपंचकलोपेताय ईशानसंज्ञकाय ऊर्ध्ववक्त्राय नमः॥ हौं॥
शशिन्यै। अंगदायै। इष्टायै। मरीच्यै। ज्वालिन्यै। गन्धचंदनेन। बिल्वकनककुष्ठधूस्तूरपुष्पैश्च चं
दनधूपेश्च न घृतदीपेन। शर्करादध्योदननैवेद्योपचारैः॥ ध्यानं। व्यक्ताव्यक्तगुणोत्तरं सुवदनं षड्विंश
तत्त्वाधिकं तस्मादुत्तरतत्त्वमक्षरमिति ध्येयं सदा योगिभिः। वंदे तामसवर्जितेन मनसा सूक्ष्मा
तिसूक्ष्मं परं शांतं पंचममीश्वरस्य वदनं खं व्यापि तेजोमयं॥ इत्यूर्ध्ववक्त्रपूजनं। इति पंचवक्त्रपूजनं॥
तत्र कलशस्थितानाम् अघोरादिमूर्तीनां पूजनं। ऊं अघोराय। पशुपतये। शर्वाय। विरूपाय। विश्वरू
पाय। त्र्यंबकाय। कपर्दिने। भैरवाय। शूलपाणये। ईशानाय। महेशानाय। इत्येकादशरुद्रपूजनं॥
ततो दलेषु प्रागादिशक्तिपूजनं। उमायै। शंकरप्रियायै। गौर्यै। पार्वत्यै। कालिंद्यै। कोटव्यै। विश्व
धारिण्यै। गंगायै॥ ततः द्वारपालानां। गणपतये। स्वामिकुमाराय। पुष्पदंताय। कपर्दिने। नंदिने। म
हाकालाय। नगरातये। स्कंदाय। ईशानपूर्वयोर्मध्ये चंडीने नमः। ततो दिग्पालपूजनं। संपुट
मंत्रैः नाममंत्रैर्वा। इंद्राय। अग्नये। यमाय। निर्ऋतये। वरुणाय। वायवे। सोमाय। ईशानाय। ब्रह्मणे।
अनंताय। अथ ग्रहपूजनं। आदित्यादिकेतुभ्यो नमः ईशानपूर्वयोर्मध्ये। ॐ देवसमूहघातिपुष्पांज

२०

© Dharmartha Trust J&K. Digitized by eGangotri

ति

लित्रयर्घदानं॥ ॐनमो भगवते रुद्राये मंत्रेण। एषा ते रुद्रभाग इति पंचमुद्राप्रदर्शनं। तथा। लिं
गमुद्रा। पद्ममुद्रा। कालकर्णीमुद्रा। योनिमुद्रा। धेनुमुद्रा॥ दक्षिणांगुष्ठं ऊर्ध्वं वामांगुष्ठेन वेष्ट
यित्वा सर्वा अंगुलीः परस्परं बंधयेत् इति लिंगमुद्रा। पद्ममुद्रा धेनुमुद्रा पूर्वोक्ता। मिथिः
कनिष्ठिके बद्ध्वा तर्जनीभ्यां अनामिके बद्ध्वा अनामिकयोर्ध्वं दीर्घं मध्यमयोरधः अंगुष्ठाग्र
द्वयं न्यसेत्सा योनिमुद्रा। मुष्टिद्वयं संसक्तं ऊर्ध्वांगुष्ठयुगलं अधोमुखं न्यसेत्तु सा का
लकरणीमुद्रा। एवं मुद्रापंचकं दर्शयित्वा। ततो ध्यानरूपा स्तुतिः। त्रिलोचनं चतुर्बाहुं स
र्वाभरणभूषितं नागयज्ञोपवीतं च व्याघ्रचर्मोत्तरीयकं। वृषस्कंधसमारूढं उमादे
हार्धधारिणं। अमृतेनाप्लुतं शांतं चंद्रार्धकृतशेखरं॥२॥ शुद्धस्फटिकसंकाशं जटामु
कुटमंडितं॥ वरदाभयहस्तं च सर्वकामफलप्रदं॥३॥ एवं ध्यायेद्द्विजः सम्यग् अनंगांगहरं हरं।
ॐ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर॥४ यत्पूजितो मया देव परिपूर्णं तदस्तु मे। आवा
हनं न जानामि न जानामि विसर्जनं। पूजनं च न जानामि क्षमस्व परमेश्वर॥ अनया यथाश
क्तिकृतया पूजया भगवान् श्रीरुद्रः सपरिवारः प्रीयतां। ततो रुद्रजपो यथोक्तः। इति रु
द्रविधानं समाप्तं॥ अथ मुद्रालक्षणं। सम्यक्कुसंहरितः पुष्पैः करांभ्यां रचितांजलिः॥ आवा
हनीयमाख्याता मुद्रा देशिकसत्तमैः॥१॥ अधोमुखीत्वियं चेत्स्यात् स्थापने कर्माणि स्थापनमुद्रा॥२
संनिधानमुद्रा। आश्लिष्टमुष्टियुगला प्रोन्नतांगुष्ठयुग्मिका। संनिधाने समुद्दिष्टा मुद्रेयं तंत्रवे

स्थापनमुद्रा २

© Dharmartha Trust J&K. Digitized by eGangotri

दिन्निः॥३ संनिरोधमुद्रा॥ अंगुष्ठगर्भिणी मुष्टी सैव सन्निरोधे समीरिता॥४॥ कौक्षकसीकरणमुद्रा देव
तांगेण हृंशानां न्यासः स्यात्सकलीकृतिः॥५॥ अवगुण्ठनमुद्रा॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमु
खतर्जनी॥ अवगुण्ठनमुद्रेयं मन्त्रितो भ्रामिता मता॥६॥ धेनुमुद्रा॥ अन्योन्याभिमुखाः श्लिष्टाः क
निष्ठानामिकाः पुनः। तथा च तर्जनीमध्या धेनुमुद्रा समीरिता॥७॥ महामुद्रा॥ अन्योन्यग्रथितांगुष्ठा
प्रसारितपरांगुलिः। महामुद्रेयमाख्याता परमीकरणे बुधैः॥८॥ योनिमुद्रा॥ वामस्य मध्यमा ...मांगु
तर्जन्यग्रे नियोजयेत्। अनामिकां कनिष्ठां च तस्यांगुष्ठेन पीडयेत्। दर्शयेद्दक्षिणे तस्के धे
नुमुद्रेयमीरिता॥९॥ बाणमुद्रा॥ दक्षमुष्टिस्थतर्जन्या दीर्घया बाणमुद्रिका॥१०॥ पद्ममुद्रा॥ करौ तु संहतौ
कृत्वा संमुखौ पुनर्नतांगुली॥ तलौ। तथैव विरलांगुष्ठौ कुर्यात्पद्ममुद्रिका॥११॥ ज्ञानमुद्रा॥ तर्जन्यं
गुष्ठकौ सक्तौ वग्रतो हृदि विन्यसेत्। वामहस्ताम्बुजं वामजानुमूर्ध्नि विन्यसेत्। ज्ञानमुद्रा भवे
देषा ज्ञानिनां निज~~...~~वत्तु नाश॥१२॥ कवचमुद्रा॥ करद्वंद्वांगुलयो वर्मणि स्युः प्रसारिता॥१३॥
व्यापकमुद्रा॥ उत्तानौ तादृशावेव व्यापकांजलिकौ करौ॥१४॥ लिंगमुद्रा॥ उच्छ्रितं दक्षिणांगुष्ठं वा
मांगुष्ठेन बंधयेत्। वामांगुलीर्दक्षिणाभिरंगुलीभिश्च वेष्टयेत्। लिंगमुद्रेयमाख्याता
शिवसांनिध्यकारिणी॥१५॥ योनिमुद्रा॥ मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके। अनामिकोर्ध्वसंश्लि
ष्टदीर्घमध्यमयोरधः॥ अंगुष्ठाग्रद्वयं न्यसेद्योनिमुद्रेयमीरिता॥१६॥ कालकर्णीमु॥ अंगुष्ठावुन्नतौ न चा
मुष्ट्योः संलग्नयोर्द्वयोः। तावेवाभिमुखौ कुर्यान्मुद्रैषा कालकर्णिका॥१७॥ अंगुष्ठेन कनिष्ठां तु बद्ध्वा
शिष्टांगुलित्रयं। प्रसारयेत्त्रिशूलाख्यमुद्रेयं परिकीर्तिता॥१८॥ इति त्रिशू
नादसौ संयुतौ। लमुद्रा॥

२१

© Dharmartha Trust J&K. Digitized by eGangotri

जपेसंपूर्णेजाते मंडपस्येशानप्रदेशे प्रतीच्यां वा होमानुसारि कुंडं वा स्थंडिलं कार्यं। तत्र होमद्रव्या
दि संभारानुसन्धाय होमं कुर्यात्। कात्यायनमते रुद्रजपे त्वाहुतित्रयं। रुद्र्यां ३३ रुद्रे ३६३ महारु
द्रे ३८५३ इत्यातिरुद्रे ३८५२३ पराशरवाक्यं। जपमेकादिमंत्राणां सहस्रैकादशान्वितं। तथाष्टस
प्ततिमंत्रा महारुद्रे प्रकीर्तिताः। एकादशसहस्राणि शतमष्टोत्तरं तथा। होमः प्रोक्तो दशांशोयं म
हारुद्रे मनीषिभिः। परशुरामः। नवन्यूनशतान्यष्टौ सहस्राणि दशैव तु। रुद्राणां होमदशांशेन
महारुद्रे मनीषिभिः। पराशरः। अग्रकर्मान्यतिजान्यापि यवान्यास्तमि घोपि वा। ध्यं त्वायेति कुर्या
त् स्वस्तिवाचनाद्य स्विष्टकृदन्तं। बौधायनः। पापक्षये त्रिचारे च तथा व्याधिविमोचने। पालाशाः समि
धः कार्या नान्यत्रोक्ता तद्दर्शनात्। उदुंबरपर्वश्च समिधो मधुकाश्च तथा स्मृताः। ग्रामस्याश्चात्राघकामेन
श्रिये शांत्यै च पायसं। सर्वकामे नवान्नाच्य मा शर्ध्या स्तिलाः स्मृताः। दूर्वा तिलेन काम्यं तथा दूर्वा तेज
स्कामेन वै घृतं। ब्रीह्ययः पशुकामेन राष्ट्रकामेन तिलयवाः इति। अथ कुंडं द्विहस्तं। तच्च त्रिकोणा
लंकृतं लक्षणं॥ तत्र पंचसंस्काराः निधूमं अग्निं निधानं। योनिमुद्रया आवाहनं। रुद्र
तेज समुद्भूतं द्विमूर्धानं द्विनासिकं। षडक्षं च चतुःश्रोत्रं त्रिपादं सप्तहस्तकं। याम्यभागे च
तुर्हस्तं सव्यभागे त्रिहस्तकं। स्रुवं स्रुचं च शक्तिं च अक्षमालां च दक्षिणे। तोमरं व्यजनं चैव घृत
पात्रं तु वामके। बिभ्रतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकं। दक्षिणे च चतुर्जिह्वं
त्रिजिह्वमुत्तरं मुखं। द्वादशकोटिमूर्त्याख्यं द्विपंचाशत्कलायुतं। स्वाहास्वधावषट्कारै रं
कितं मेषवाहनं। रक्तमाल्याम्बरधरं रक्तपद्मासनास्थितं। रौद्रं तं शिवनामानं वह्निमा

© Dharmartha Trust J&K. Digitized by eGangotri

वाहयाम्यहं पुष्पांजलिः। त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते। आगच्छ भगवन्नग्ने य
ज्ञेस्मिन् संनिधो भव। चंदनागुरुधूपैः इजनं। जातनामानमग्निं वैमोरु इत्यावाह्य। इ
हागच्छ। इह तिष्ठ। इह संनिहितो भव। इह संनिरुद्धो भव। इह अवगुंठितो भव। इह
सकलीकृतो भव। इह अमृतीकृतो भव। इति सप्तमुद्रां प्रदर्शयेत्। क्रमेण उत्तानां
जलिः। न्युब्जांजलिः। मुष्टियुग्मं मूर्द्ध्नि अंगुष्ठं गुप्तांगुष्ठयुग्ममुष्टी। उत्कृष्टवामतर्जनी
परिभ्रामणं। देवतांगे षडंगन्यासकरणं। गोस्तनाकारकरणं। इति सप्तमुद्रालक्षणा
नि। आचमनं। प्राणायामः। देशकालस्मरणं। अस्य कृतस्य महारुद्राख्यस्य कर्मणः
परिग्रहणीतासिद्ध्यर्थं जपदशांशान्वृत्तहोमं ग्राह्यं तांडुलेन चरुणा। उक्तउक्तसमि
आज्याहुतिभिः गवेधुकेन चरुणा तिलाज्याहुतिभिश्च वरदाग्नौ हवनं। हुति
युक्तेन वा हुतं यच्छेत्। पात्रासादनं। पवित्रे पवित्राणि। आज्यस्थाली। चरुस्थालीद्वयं। सं
मार्जनीकुशाः उपकुशाः। तिस्रः समिधः। स्रुवः। आज्यं। तंडुलाः। गवेधुकाः। पूर्णपात्रं
उपकल्पनीयानि। ग्रहाणां समिधः। अर्कादयः। यवाः। तिलाः। नालिकेरं। दुकूलं। ना
गपत्राणि। स्रुक् स्रुवः। स्तनद्वयं उपरितनकाष्ठं। शिक्यं। घटः। पञ्चदशाज्यार्थं दधिशर्करा। १२
मधु। दुग्धं। शाकल्यं तु हरणादि। पवित्रच्छेदनं। प्रोक्षणी संस्कारः। प्रोक्षणां यथोक्तं। अपणा २१

© Dharmartha Trust J&K. Digitized by eGangotri

दि। आज्यचरुणा मुद्गमन्नं तेः सुधेनुमुद्राप्रदर्शनं। वंबीजं जपेत्। ततः सर्वस्त्रानेआस
प समिध्होमः। पर्युक्षणं तेवह्निर् जा शांडिल्यसगोत्रं शांडिल्यासितदेवल प्रवरं चारुणपां
वरुणाज्ञातं शत मंगल नामानं अग्निमा ध्यये। तदं ते आघारौ आज्यभागौ। व
रुणस्योत्तं चमनं। तप्तहाटकवर्णाभं त्रुंग पिंगल लोचनं। दक्षिणे स्वाहयायुक्तं
मुत्तरे स्वधयायुतं। पत्नीद्वययुतं ध्यायेद्वह्निं सर्वार्थसिद्धये। ततः समिदाज्यचर्वा
दि ग्रहसंमंधिहोमो ग्रहमंत्रैरा कृष्णेनेत्यादिभिः। ततः रुद्रादीनां देवानां त्र्यंबका
दिभिः। ततो गुरुादीनां अधिदेवतानां स नः पितेत्यादिमंत्रैः। पंचजं वोद्दरादीनां गणानां
त्या सोदिमंत्रैः। ततः रौद्रहोमारंभः। ॐ ह्रीं नमः शंभवाय रुद्राय नमः। ॐ ह्रीं मयोभवाय शिरसे
स्वाहा। ॐ ह्रीं नमः शंकराय शिखायै वषट्। ॐ ह्रीं मयस्कराय कवचाय हुं। ॐ ह्रीं नमः शिवा
य च नेत्रत्रयाय वौषट्। ॐ ह्रीं शिवतराय च अस्त्राय फट्। ततो वह्निरूपाय महादेवा
य नम इति पूजा। एवं समिध्होमः। पालाशबिल्वोदुंबर मंदार वटाश्वत्थ काम्रजादि
भिः एषदाज्या कै नमः शंभवायेति १०८ ततो नेनैव मंत्रेणाज्याहुतिः १०८ ततोप्यनेनै
व गावे धुकेवल्वाहुतिः। ततः तिलाहुतिरनेनैव १००८ ततः पुष्पफलादि। पायसेन मधुसि
ताघृतयुतेन वयाते रुद्र शिवेति नमो देव्यै वासिनी वालि ट्यपुष्पके ह्रीं स्वाहा इति शक्तिहोमः॥
गणानां त्वेति लडुकहोमो गणपतेः। स्कंद पुष्पदंत कपर्दी नंदी चंड महाकाल भृंगिणेति लैः। दूर्वाज्य स
र्पिषेद्गांऽगुग्गुलैस्त्र्यंबकं। जातवेदसं सर्षपैः। त्वविताऽरं त्रिलाज्येन। दध्योदनेन चित्पतुं। पंचामृतेन

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीयं॥ तिलाज्येनदिक्पालानुं स्वैस्वैर्मन्त्रैः स्थापितानो॥ नमोस्तेर्वा। अष्टोत्तरं व्याहृत्या प्राजापत्यं होमः
इ कया अन्योपि होमः। ततः अनयोश्चरोः स्विष्टकृत् तु। ततो नवाहुति होमः। ततो दिक्पालपूजनं। अथ हो
शक्रं गजेन्द्रस्थो वज्रहस्तः पुरंदरः। पूज्यः स्मातारमिंद्रेण प्राचीं रक्ष शतक्रतो॥ इंद्राय नमः। शक्राय नमः।
वज्राय नमः। ऐरावताय नमः। इदं चंदनं। एष धूपः। एष दीपः। इदं माषभक्तं बलिं इंद्राय सांगाय
सपरिवाराय कल्पयामि। ततः पुष्पांजलिः। इंद्रः सुरपतिर्जिष्णुः स्वर्लोकेश महाबल। शतयज्ञा
धिपस्त्वं हि तुभ्यं यज्ञात्मने नमः॥ एवं उपचारा अपि ते स्तुतिः सर्वेषां॥१॥ अथ हो पावकमेषस्कंश
क्तिबाणधरप्रभो। त्वंन्नो अग्ने तवेत्यचो रक्षाग्नेयीं हुताशन। अग्नये नमः। स्वाहायै। धूम्रकेतवे। मे
षाय। सर्वदेवमयो देवो रक्तो वह्निर्महाभुजः। सप्तजिह्व महाकाय वैश्वानर नमोस्तु ते॥२॥ अथ
हो महिषमारूढ वैवस्वत सुरार्चितः। दंडपाणे दिशं रक्ष सुगन्धं सर्वदा दक्षिणां। यमाय। वारा
हो। दंडाय। महिषाय। दंडहस्तो ~~[illegible]~~ हस्तामयो देवो धर्मराज महाभुजः। महाबल महा
देव धर्ममूर्ते नमोस्तु ते॥३॥ अथ हो निर्ऋतिं दिक्पालं कौशिकारूढ खड्गहस्तनुं। अथ स्तुत्वं तेति
संपूज्य निर्ऋते रक्ष निर्ऋतिं॥ निर्ऋतये। खड्गिने। खड्गाय। कौशिकायै। रक्षसां रक्षणार्था
यत्र वानत्र प्रतिष्ठितः। यत्र भूमिं च निर्विघ्नां कुरुत्वं रक्ष सांप्रतं॥४॥ अथ हो वरुण वारी
श पाशहस्त मकरस्थं। तत्वायामीति संपूज्य वारुणीं रक्ष मे दिशं। वरुणाय। वारुणेय। पाशाय। १३।

© Dharmartha Trust J&K. Digitized by eGangotri

मत्स्याय। पाशांकुशधरो देवो जलराशप्रचिपो महान्। निम्नगामीति विख्यातो वरुणो वर-
दोस्तु मे ॥५॥ अहो वायो मृगारूढ जगत्प्राण ध्वजायुध। आनो नियुद्भिरध्वर्यो वायवीं रक्ष मे
दिशं। वायवे मृगारूढाय अंकुशायाम गाय। प्राणिनां प्राण एव त्वं महाबल पराक्रम। मह-
वेगवतां श्रेष्ठ सदागते नमोस्तु ते ॥६॥ अहो सोम दशाश्वस्थ गदाधर वरप्रद। वयं सोमेति
संपूज्य उदीचीं रक्ष मे दिशं। सोमाय रोहिणीपतये गदायै दशाश्वाय। नक्षत्राणां च सर्वेषा-
मोषधीनामधीश्वरः। सुरत्राण जगत्प्राण शंभुरूपेण पाहि मां ॥७॥ अहो वृषभमारूढ शू-
लहस्त सुरार्चित। तमीशानेति संपूज्य ऐशानीं रक्ष मे दिशं। ईशानाय मलिन्यै। शूलाय
वृषभाय। पिनाकधरेशाय ते शशिशेखर गिरिजाप्रिय जगत्कर्ता च भर्ता च संहर्तासि हर।
शुभेश्वर ॥ अहो हंससमारूढ कमंडलुधरप्रभो। ऊर्ध्वमूर्ध्वेति संपूज्य ब्रह्मन् रक्षो-
र्ध्वगां दिशं। ब्रह्मणे सावित्र्यै कमंडलवे हंसाय। स्वयंभूस्तु सुराध्यक्ष त्रिदशै-
र्वंदितः सदा। वेदगर्भ वेदगर्भस्त्वं प्रजापते नमोस्तु ते ॥९॥ अहो गरुडमारूढ शंखचक्रग-
दाधरः स्तो नाद्पृथिवीसंपूज्य रक्षाधस्तां दिशं हरे। अनंताय नाग्नि श्रियै। चक्राय-
गरुडाय। यो सावनं तरुच्छेदाज्ञैओ कंसचराचरं ॥ पुष्पवद्धारितं येन तस्मै श्रीह-
रये नमः ॥१०॥ एते चान्ये च बहवो दिग्पाला दिक्षु संस्थिताः। अग्निविष्णुशिवैः सार्धं
रक्षां कुर्वंतु सर्वतः ॥ देवदानवगंधर्वायक्षराक्षसपन्नगाः। मुनयो मनवो गा-

© Dharmartha Trust J&K. Digitized by eGangotri

वो देवमातरयवरं एते ममाधुरे रक्षां प्रॐ वैश्रुमुदान्विताः इति दिग्पालपूजा। विधा
या स्थापितैकादशानां रुद्राणां ग्रहादीनां स्थापितानां च पूजनं चंदनपुष्पधूपदीपना
नानैवेद्याद्यैः तां कुक्षा रात्रिकादि यथोक्तं कुर्यात् दीक्षापात्रपूजनं तत्र मातृका च
ते स्विष्टकृतः पूर्वं वा कुर्यात् इति केचन। ॐ उपरितो मेऽपपरितो वा। ततः देशकालौ
स्मृत्वा अस्य समस्त रुद्राख्यस्य होमस्य सांगतासिद्ध्यर्थं वसोर्धारासमन्वितां पूर्णा
हुतिमहं करिष्ये। आज्यस्थाल्यामाज्यनिर्वापः। अधिश्रयणं। पर्यग्निकरणं। अपरां ... वर्षासु
वा स्रुवेण पूर्णाहुतिः। तयोः प्रतपनं दर्भैः संमार्गः। अभ्युक्षणं पुनः प्रतपनं निधानं। आज्यो
द्वासनं आज्योत्सवनं अवेक्षणं चतुर्गृहीतेन स्रुचः पूरणं। दुकूलेन वेष्टनं नालिकेरस्य तां
बूलमालासुगंधिद्रव्यैः संयुक्तं प्रस्तकूर्चस्रुविनिधानं। उपरिन्यकुब्जस्रुवनिधानं स्रुवा तयोर्मू
लमात्रयोस्तत्तयोरुपरि काष्ठादिना दृढीतस्य प्रणालिका निधानं। तस्याप्युपरि स्रुक्पिधानं। अग्रे
रुपरि शिक्यबंधनं। तस्योपरि ॐ स्थापनं। एवं निःसरणपर्यंतं कुंभाभोगात् ... स्त्वौक
स्थापनं। म... संज्ञकमग्निमावाह्य पुष्पांजलिः। समस्ते अग्ने· शुक्रज्योतिः· ... रुतम्बा रुत ...
दृक्षासः· ... वाजश्रमेत्यादि सप्तविंशति चि...।।।
रुद्राध्यायेन मूर्धानं दिवो ... विष्णो ... स्वाहा ... वैश्वानरम् ... अथातो वै
श्वानरं जुहोतीत्यादि वा पठन् ... ते ना च्छिन्नया धारया पूर्णाहुति होमः। अस्या जरासेः सप्तदशा
... समास्थान ... वैष्णवं पुरुषसूक्तं विष्णोः कर्माणि इदं विष्णुरेव।

© Dharmartha Trust J&K. Digitized by eGangotri

तृषः १

रौद्रं नमस्त इत्यादि। ऐंद्रवं अपाठं पुनस्तुवं तस्त्र पाप्मा यस्त्वं तिस्रः। महावैश्वानरं रुद्र तावा
नं विश्वानरं तिस्रः। आज्यदोहादि सामानि वा पठिते पुनस्त्वेति नाचिकेत होमः। ताक्ष्यायामी
तिस्रश्च पुरश्चित्यो होमः। ततो रुद्रपूजनं। पार्वतीपतये नमो मध्ये। दक्षिणतो गंगायै। दुर्गायै प्रा
च्यां गणपतये। नाममंत्रैः परितो दिग्पालान्। त्वरितेन मंत्रेण पुष्पांजलिः। यस्याङ्के चौज
गत्सर्वं स्थावरं जंगमं च यत्तु। दुःखच्छिदे नमस्तस्मै ब्रह्मविष्णुशिवात्मने। विसर्गमु
द्रया वह्निं विसर्गः। स्तनयोः संमुखवाग्नौ करौ नत्वा कंपनीयौ। विविक्तेरिंद्र विसर्जनं॥
गच्छ त्वं भगवन्नग्ने स्वस्थाने ॐ कुण्डमध्यतः। हव्यमादाय देवेभ्यः शीघ्रं देहि प्रसीद मा॥ ग
च्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर। यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन। नबुद्धि
श्रुति॥ ततो होमसंकल्पः। अघोरादि एणां हुतं तं यस्य द्रव्यं यावत्या वसंख्याकं। ये
न येन मंत्रेण हुतं यया यया कामनया। तस्यै तस्यै देवतायै। तत्तद्द्रव्यं तावत्तावत्सं
ख्याकं तेन तेन मंत्रेण हुतं तया तया कामनया। तस्यै तस्यै देवतायै। सा सा देवता
प्रीयतां। अनेन यथाप्राप्तेन होमेन भगवान् श्री उमासहितो रुद्रः प्रीयतां। अस्य महा
रुद्राख्य कर्मणः कृतस्य होमस्य सांगतासिद्ध्यर्थं यथोपपन्नेनान्नेन ब्राह्मणमेकं
संतर्पयिष्ये तेन। कुमारिकात्रयं भोजनेनाहं तर्पयिष्ये तेन। संस्रवप्राशनं। मार्जनं। प

© Dharmartha Trust J&K. Digitized by eGangotri

सं

विन्नौ प्रतिपत्तिः। ब्रह्मणे पूर्णपात्रं सस्नुवर्णं। प्रणीताविमोकः। जपयमनमगौप्र
क्षेपः। ततो दक्षिणासंकल्पः। एतन्महारुद्राख्यस्य क्रतोः परिपूर्णतासिध्यर्थं इदमाग्ने
यं स्नुवर्णं एतावत्परिमितं सद्रव्य एतावत्संख्याकं तत्प्रतिनिधिद्रव्यं वा ब्रह्मणा
ये जापकपाठकादिभ्यो हं संप्रददास्येवं देवाः। ते नमहारुद्राख्यं कर्म सांगमस्तु। अस्मि
न्कर्मणि न्यूनातिरिक्तः। यथाकरणादिजनितदोषोपशांत्यर्थं इमां द्रव्यसीदास्यमा
नेवा। नानागोत्रेभ्यो नानानामभ्यो हं संप्रददे तेन कर्मसिद्धिरस्तु। यथोक्तविधिनायाद्द
गस्माभिर्यो त्वतो जपः। तेन यज्ञनितं पुण्यं तेन श्रपेन पुण्यवानं। भवरुद्रप्रसादात्वंत
त्पुण्यं तव नो मम। इति यजमानहस्ते सुन्तदानं। ततः कलशानां विसर्गं कृत्वा तदीये
जलैः पंचपल्लवसहितेन यजमानस्य संकटं बस्यावभृथस्नानं। अभिषेको या।
यजुर्वेदोक्तैः स्वशाखोक्तवारुणैर्मंत्रैः सुरास्त्वा इत्यादिभिः अभिषेकः। तदंते वस्त्रां
तरं परिधाय पुष्पांजलिः। शिवस्तुया। अनादिनिधनो रुद्रो गीयते श्रुतिभिः सदा।
राजसेन स्वयं ब्रह्मा सात्त्विकेन स्वयं हरिः। तामसेन स्वयं रुद्रः। त्रितयं त्वयि संस्थि
तं। नमामि [illegible] विरूपाक्षं नीलग्रीव नमोस्तु ते। त्रिनेत्राय नमस्तुभ्यं उमादेहार्धधा
रि[illegible] लक्षधारिणे तुभ्यं भूतानां पतये नमः। पिनाकिने नमस्तुभ्यं नमो मीढुष्टमा
तो। त्रि

© Dharmartha Trust J&K. Digitized by eGangotri

यथा। नमामि त्वां महाभूतपतये चाहं नमाम्यहं॥ स्वयं त्रिकालत्रिलोकाय त्रिलोकानां शुभप्रदः
स्वयं। सूर्यरूपं समासाद्य देहिनां देहदायकः॥ यतीनां मुक्तिदस्त्वं च त्रिलोकानां मुक्तिदः प्रभो। यद्
कृपया सर्वमिदं ततं मध्येव पालितं। अनंतेश विजयं नीतं शक्तिकस्मात्त्वया हते। नमो विरंचि विष्णीश
देन परमात्मने। सर्गसंस्थिति संहार व्याप्तभूतव्यक्तमूर्तये। त्वं माता त्वं पिता त्वं हि त्वं बंधुस्त्वं
च मे सखा। त्वं विद्या द्रविणं त्वं च त्वं च सर्वं मम प्रभो। मंत्रहीनं क्रियाहीनं भक्तिहीनं महेश्वर। ज
पः संपूर्णतां यातु त्वत्प्रसादात्त्रिलोचन। हीनो विभक्तिवर्णाश्च व्यंजनैरंजनैस्तथा। तत्सर्वं देवता
देव प्रसादं कुरु शंकर॥ अनुस्वारेण हीनस्य जपस्यास्ति हि तस्य वै दोषाः प्रयांतु नाशं च त्वत्प्रसा
दान्महेश्वर॥ महारुद्रजपो योयं कृतो वा पठितोपि वा। संपूर्णस्त्वत्प्रसादाद्वै भूयादिति चिंतयन्॥
इति स्तुत्वा दंडवत्प्रणमेत्॥ ततः स्वस्तिवाचनं। मंगलाशिषः। अस्य महारुद्राख्यस्य कर्मणः सां
गतासिद्ध्यर्थं। यथासंपन्नेनान्नेन भोजनेन एकादशशतं ब्राह्मणान् यथायथाकालं अह
संतर्पयिष्ये तेन श्रीभगवान् मासहितो रुद्रः प्रीयतां। इत्यन्नदानं॥ वस्त्रदानं। इच्छया भू
षान्यपि दानानि। अस्य कर्मणः सांगसिद्ध्यै श्रीमहारुद्रः प्रीतये अमन्त्रान्(?) रुद्रदैवताः गंधाद्यर्चि
ताः अमुक। अमुकशर्म्मा। संप्र। इमानि नानारूपाणि नानासांसि बृहस्पतिदैवतानि गंधाद्य
र्चितानि शंकरप्रीत्यै नानागोत्रेभ्यः॥ इमाः गाः रुद्रदैवताः गंधाद्यर्चिताः गिरीशसंतुष्ट्यै नानागो
त्रेभ्यः। उपहारदानं। इति संक्षेपतो महारुद्रकर्म्म कृत्वा पापमिति॥ बौधायन वृहत्स राशतो।

© Dharmartha Trust J&K. Digitized by eGangotri

एकादशस्वर्णनिष्काः प्रदातव्याश्च दक्षिणा ।। द्वादशपक्षं श्रीवत्साः पि विविधानिव
मुरथ्येनिष्कचोर्यदेयंचतस्मै ।। नैकुसुमकं ।। निष्कंपक्षे ऽथ देयं हिरंण्यं चविंशं प्रति ।।
दक्षिणा हेमरूप्यादि गजवाजिरथादिका ।। तुलाभन्न तिलनानि देयानि । विविधानिव ।।
प्रवत्नेनवै ।। क्षितिभोजविनोजपइएदः ।। मुरवपक्षेण चोदानादातुं शक्नोति दक्षि
णां । स्वदत्तेऽथमपक्षेण यथाशक्तस्य वृथा नवैतु । नारदाख्यां नागर श्री तिनारानाना
रायणेन लिखित्वैतं पश्यति ।। संवत् ७०१ वर्षे कार्तिके कृष्ण ११ बुधे गपर८५ श्रीरामसेवक ।।
दीक्षित अनंतदेवनीपोथी

दी। लपादेवने विभाग।।

यमारुद्रकिलापपद। नो

नं. ४६७५

१५

© Dharmartha Trust J&K. Digitized by eGangotri